अग्र एव वटी याति बलं हन्त्यग्रकोणगम् ।
यथेदं कुञ्जरो याति चतुर्दिक्षु महीपते ! ॥
तिर्य्यक् तुरङ्गमो याति लङ्घयित्वा त्रिकोष्ठकम् ।
कोष्ठकोष्ठद्वयं लङ्घ्य व्रजेन्नौका युधिष्ठिर ! ॥
सिंहासनं चतूराजी नृपाक्रान्तस्तु षट्पदम् ।
काककाष्ठं हरेन्नौका नौकाक्रान्तप्रकारकम् ॥
घाताघाते वटी नौका बलं हन्ति युधिष्ठिर ! ।
राजा गजो हयश्चापि त्यक्त्वा घातं निहन्ति च ॥
अत्यन्तं सबलं रक्षेत् खराखा बलसत्तमम् ।
अल्पस्यारक्षया पार्थ ! हन्त्यर्थं बलमुत्तमम् ॥
नौकायाश्चत्वारि पदानि अश्वस्याष्टौ पदानि इत्याधिक्यमश्वस्य ॥
मतङ्गजस्य गर्व्वेण राजा क्रीड़ति निर्भरम् ।
तस्मात् सर्व्वबलं दत्वा रक्ष कौन्तेय ! कुञ्जरम् ॥
सिंहासनं चतूराजी यदवस्थानतो भवेत् ।
सर्व्वैर्य्योगैर्नवापि रक्षितव्यो महीपतिः ॥
अन्यदाजपदं राजा यदाक्रान्तो युधिष्ठिर ! ।
तदा सिंहासनं तस्य भण्यते नृपसत्तम ! ॥
राजा च नृपतिं हत्वा कुर्य्यात् सिंहासनं यदा ।
द्विगुणं वाहयेत् पणमन्यथैकगुणं भवेत् ॥
द्विगुणं पणं दातव्यस्तेन प्रापयेत् ॥
मित्रसिंहासनं पार्थ यदारोहति भूपतिः ।
तदा सिंहासनं नाम सर्व्वं नयति तद्बलम् ॥
यदा सिंहासनं कर्त्तुं राजा बलपदाश्रितः ।
तदा घातेऽपि हन्तव्यो बलेनापि सुरक्षितः ॥
विद्यमाने नृपे यत्र स्वकीये च नृपत्रयम् ।
प्राप्नोति च तदा तस्य चतूराजी यदा भवेत् ॥
नृपेणैव नृपं हत्वा चतूराजी यदा भवेत् ।
द्विगुणं वाहयेत् पणमन्यथैकगुणं भवेत् ॥
स्वपदस्थं यदा राजा राजानं हन्ति पार्थिव ।
चतुरङ्गे तदा भूप ! वाहयेच्च चतुर्गुणम् ॥
यदा सिंहासने काले चतूराजी समुत्थिता ।
चतूराजी भवत्येव न तु सिंहासनं नृप ! ॥
अत्रेदं बीजं उभयथा जयेऽपि परसिंहासनाधिकारात् परराजवधे शौर्य्याधिक्यनिष्कण्टकत्वदर्शनात् । क्रीड़ायामपि तथा कल्प्यते ॥ * ॥
राजद्वयं यदा हस्ते आत्मनो राज्ञि संस्थिते ।
परेण संहृतश्चैको बलेनाप्यपहार्य्यते ॥
राजद्वयं यदा हस्ते न स्यादन्यकरे परः ।
तदा राजा हि राजानं घातेऽपि तं हनिष्यति ॥
नृपाकृष्टे यदा राजा गमिष्यति युधिष्ठिर ! ।
घाताघातेऽपि हन्तव्यो राजा तत्र न रक्षकः ॥
कोणं राजपदं त्यक्त्वा वटिकान्तं यदा व्रजेत् ।
वटी नयेत् पदं नाम तदा कोष्ठबलं च षट् ॥
यदि तस्य भवेत् पार्थ ! चतूराजी च षट्पदम् ।
तदापि च चतूराजी भवत्येव न संशयः ॥
पदातिः षट्पदं विद्धे राजा वा हस्तिना तथा ।
षट्पदं न भवेत्तस्य अवश्यं ध्रुवं पार्थिव ॥
सप्तमे कोष्ठके या स्याद्वटिका दशकेन वै ।
तदान्योन्यस्य हन्तव्यं सुखाय दुर्ब्बलं बलम् ॥
त्रिवटीकस्य कौन्तेय ! पुरुषस्य कदाचन ।
षट्पदं न भवत्येव इति गौतमभाषितम् ॥
नौकैका वटिका यस्य विद्यते खेलने यदि ।
गाढ़ावटीति विख्याता पदं तस्य न दुष्यति ॥
गाढ़ाघात्यपदं राजपदं कोणपदञ्च तत् ।
हस्ते रङ्गे बलं नास्ति काककाष्ठं तदा भवेत् ॥
वदन्ति राक्षसाः सर्व्वे तस्य न स्तो जयाजयौ ।
प्रार्थिते पञ्चमे राज्ञि स्तवश्चाष्ट षट्पदे ॥
अष्टौ च स्यात्तदा राजन् ! चलित्वा चालितं पदम् ।
द्विराष्टत्वा गतौ तस्माद्धन्यात् परबलं जयी ॥
सिंहासनं भवत्येव काककाष्ठं न भण्यते ॥
उपविश्य यत् स्थानं तस्योपरि चतुष्टये ।
नौकाचतुष्टयं यत्र क्रियते यस्य नौकया ॥
नौकाचतुष्टयं तत्र हन्नौकेति भण्यते ।
न कुर्य्यादेकदा राजन् ! गजस्याभिमुखं गजम् ॥
यदि कुर्व्वीत धर्म्मज्ञ ! पापयुक्तो भविष्यति ।
स्थानाभावे यदा पार्थ ! हस्तिनं हस्तिसम्मुखम् ॥
करिष्यति तदा राजन्निति गौतमभाषितम् ।
प्राप्ते गजद्वये राजन् ! हन्तव्यो वामतो गजः ॥”
इति तिथ्यादितत्त्वे चतुरङ्गक्रीड़नम् ॥

चतुरङ्गा, स्त्री, (चत्वारि अङ्गानि यस्याः ।) घोटिकाहयः । इति राजनिर्घण्टः ॥

चतुरङ्गिणी, स्त्री, (चत्वारि अङ्गानि हस्त्यश्वरथपदातयः सन्त्यस्यामिति । चतुरङ्ग + इनिः ।) चतुरङ्गसेना । इति रामायणम् ॥ (यथा, महाभारते । १ । ७३ । २० ।
“प्रेषयिष्ये तवार्थाय वाहिनीं चतुरङ्गिणीम् ॥”)

चतुरङ्गुलः, पुं, (चतस्रः अङ्गुलयः परिमाणमस्य । समासे अच् ।) आरग्वधवृक्षः । इत्यमरः । २ । ४ । २३ ॥ (यथा, सुश्रुते सूत्रस्थाने ४४ अध्याये ।
“विरेचनानि सर्व्वाणि विशेषाच्चतुरङ्गुलात् ॥”)
चतुरङ्गुलिपरिमिते त्रि ॥ (यथा, शतपथब्राह्मणे । १० । २ । २ । १ ।
“स चतुरङ्गुलमेवोभयतोऽन्तत उपगूहति ॥”)

चतुरम्लं, क्ली, (चतुर्णां अम्लानां समाहारः ।) चतुर्व्विधाम्लद्रव्यम् । यथा, भावप्रकाशे ।
“अम्लवेतसवृक्षाम्लबृहज्जम्बीरनिम्बुकैः ।
चतुरम्लं हि पञ्चाम्लं बीजपूरयुतैर्भवेत् ॥”

चतुरस्रः, त्रि, (चतस्रोऽश्रयोऽस्य । “सुप्रातसुश्वसुदिवेति ।” ५ । ४ । १२० । इति अच्प्रत्ययेन निपातितः ।) चतुष्कोणः । यथा,—
“चतुरस्रं त्रिकोणं वा वर्त्तुलं चार्द्धचन्द्रकम् ।
कर्त्तव्यमानुपूर्व्व्येण ब्राह्मणादिषु मण्डलम् ॥”
इत्याह्निकतत्त्वे बौधायनः ॥
तस्याश्चतुर्थाष्टमलग्नम् । इति दीपिका ॥

चतुराननः, पुं, (चत्वारि आननानि मुखानि यस्य ।) ब्रह्मा । इत्यमरः । १ । १ । १६ ॥ तस्य चतुराननत्वे कारणं यथा,—
“तस्यां स चाम्भोरुहकर्णिकाया-
मवस्थितो लोकमपश्यमानः ।
परिक्रमन् व्योम्नि विवृत्तनेत्र-
श्चत्वारि लेभेऽनुदिशं मुखानि ॥”
इति श्रीभागवते । ३ । ८ । १६ ॥ (यथा,—
“इतरतापशतानि यथेच्छया
वितर तानि सहे चतुरानन ! ।
अरसिके तु रहस्यनिवेदनं
शिरसि मा लिख मा लिख मा लिख ॥”
इत्युद्भटः ॥)

चतुरूषणं, क्ली, (चतुर्णां ऊषणानां समाहारः ।) पिप्पलीमूलसहितं त्रिकटु । यथा, भावप्रकाशे ।
“त्र्यूषणं सकणामूलं कथितं चतुरूषणम् ।
व्योषस्येव गुणाः प्रोक्ता अधिकाश्चतुरूषणे ॥”

चतुर्गतिः, पुं, (चतुर्भिर्गतिरस्य ।) कच्छपः । इति हेमचन्द्रः । ४ । ४१६ ॥ (चतुर्णां आश्रमाणां वर्णानां ब्राह्मणादीनां यथोक्तकारिणां गतिराश्रयः । विष्णुः । यथा, महाभारते । १३ । १४६ । ६५ ।
“चतुर्मूर्त्तिश्चतुर्बाहुश्चतुर्व्यूहश्चतुर्गतिः ॥”)

चतुर्थः, त्रि, चतुर्णां पूरणः । (“तस्य पूरणे डट् ।” ५ । २ । ४८ । इति डट् । ततः “षट्कतिपयचतुरां थुक् ।” ५ । २ । ५१ । इति थुक् ।) चतुर्थसंख्यापूरणः । इति मुग्धबोधम् ॥ चौठा इत्यादि भाषा ॥

चतुर्थांशः, पुं, (चतुर्थः अंशः ।) चतुर्भागैकभागः । तत्पर्य्यायः । तुरीयः २ पादः ३ । इति राजनिर्घण्टः ॥ (चतुर्थः अंशो यस्य । चतुर्थांशस्वामिनि त्रि । यथा, मनुः । ८ । २१० ।
“तृतीयिनस्तृतीयांशाश्चतुर्थांशाश्च पादिनः ॥”)

चतुर्थिका, स्त्री, पलपरिमाणम् । इति वैद्यकपरिभाषा ॥

चतुर्थी, स्त्री, (चतुर्णां पूरणी । “तस्य पूरणे डट् ।” ५ । २ । ४८ । इति डट् । ततः “षट्कतिपयचतुरां थुक् ।” ५ । २ । ५१ । इति थुक् । ततष्टित्त्वात् ङीप् ।) तिथिविशेषः । सा तु चन्द्रस्य चतुर्थकलाक्रियारूपा । इति स्मृतिः ॥ (चतुर्थी तु पञ्चमीयुता ग्राह्या । “युग्माग्निकृतभूतानि ।” इति युग्मवचनात् तथा,—
“एकादश्यष्टमी षष्ठी अमावास्या चतुर्थिका ।
उपोष्याः परसंयुक्ताः पराः पूर्व्वेण संयुताः ॥”
इत्यग्निपुराणवचनाच्च ॥
भविष्ये,—
“अमा वै सोमवारेण रविवारेण सप्तमी ।
चतुर्थी भौमवारेण अक्षयादपि चाक्षया ॥’
यत्तु,—
‘चतुर्थीसंयुता कार्य्या तृतीया च चतुर्थिका ।
तृतीयया युता नैव पञ्चम्या कारयेत् क्वचित् ॥’
इति ब्रह्मवैवर्त्तवचनं पञ्चमीयुतानिषेधकं तद्विनायकव्रतपरमिति गुरुचरणाः तृतीयायुतानिषेधकत्वे क्वचिदित्यनुपपत्तेः सर्व्वत्रैव पञ्चमीयुताया ग्रहणात् । सारस्वत्यादिप्रदोषमाह ।
‘त्रयोदश्याञ्चतुर्थ्याञ्च सप्तम्यां द्वादशीतिथौ ।
प्रदोषेऽध्ययनं धीमान् न कुर्व्वीत यथाक्रमम् ।
सारस्वतो गाणपतः सौरश्च वैवस्वतस्तथा ।’
प्रदोषशब्दोऽत्र प्रथमप्रहर इति हेमाद्रिः ।